International Journal of Sanskrit Research 2022; 8(3): 379-381

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(3): 379-381
© 2022 IJSR
www.anantaajournal.com
Received: 23-03-2022
Accepted: 28-05-2022

**डॉ० कुमारी रंजु**
पूर्व शोधार्थी, कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालय, कामेश्वरनगर, दरभंगा, बिहार, भारत

**Corresponding Author:**
**डॉ० कुमारी रंजु**
पूर्व शोधार्थी, कामेश्वरसिंह दरभंगा संस्कृत विश्वविद्यालय, कामेश्वरनगर, दरभंगा, बिहार, भारत

# काव्यस्य आधुनिक महाकाव्य दृष्ट्या समीक्षणम्

**डॉ० कुमारी रंजु**

**सारांश :**
आधुनिकेन संस्कृतसाहित्येन भारतीयाय वाङ्मयाय अनेके महान्तः साहित्यकाराः समुपहृताः। आधुनिकस्य संस्कृतसाहित्यस्य कलावधिः शताब्ददद्वयमध्यवर्ती। नायं कालः केवलं भारतस्य प्रत्युत विश्वेस्येतिहासस्य दृष्ट्या नैकेषामुवेलमानां परिवर्तनानाञ्च कालः। कलावधावस्मिन् विश्वयुद्धद्वयं घटितम्, जापानदेशस्य नगरूद्वये, हिरोशिमाख्ये नागासाकीत्याख्ये च अणुबम-प्रहारजन्या मानवसंहार रूपा दुःस्थितिरूत्पन्ना, भारते आङ्ग्लशासनस्य विरोधे प्रबलः सङ्घर्षः प्रवृत्तः, यस्य स्वातन्त्र्यप्राप्तिरूपः परिणामः समजनि, भारतस्य विभाजनेन सममेव साम्प्रदायिकाः कलहाः प्रवर्तन्त। वर्षैकावधिक एव काले महात्मागान्धिनां बलिदानं दुर्घटितम्, अनेके महान्तो विभूतिमत्सत्त्वरूपा नेतारः समजनिषत, यैः स्वदेशे राष्ट्रियाया भावनायाः समुद्बोधनं सामाजिकीषु कुरीतिषु प्रहारश्च कृतः, स्वातन्त्र्ययप्राप्त्यनन्तरं भारतमेकमखण्ड राष्ट्र लोकतन्त्रात्मकगणराज्यरूपेण च प्रतिष्ठितम्। सर्वमिदमन्यासां भारतीयानां भाषाणां साहित्येष्विव संस्कृतभाषारूपे आधुनिकसाहित्यदर्पणेऽपि स्फुटतया निमालयितुं शक्यते।

**कूटशब्द:** मानवसंहार विरोधे प्रबलः सङ्घर्षः प्रवृत्तः, यस्य स्वातन्त्र्यप्राप्तिरूपः

**प्रस्तावना :**
शक्तिजय महाकाव्यम् प्रो० भोला शंकर व्यासस्य श्रेष्ठं महाकाव्यं विद्यते। अस्य महाकाव्यस्य कथावस्तु दुर्गासप्तशति ग्रन्थस्य उत्तरचरित (शुम्भवध-प्रकरण) विद्यते । दुर्गाशप्तसती ग्रन्थे दशम अध्याये अनेन रूपेण शुम्भवध-प्रकरण प्राप्यते।

देव्युवाच- एकैवाहं जगत्यत्र द्वितीया का ममापरा।
पश्यैता दुष्ट मय्येव विशन्त्यो मद्विभूतयः।
ततः समस्तास्ता देव्या ब्रह्मणीप्रमुखालयम्।
तस्या देव्यास्तनौ जग्मुरैकैवासीत्तदाम्बिका।

तदन्तरम् ऋषिरुवाच-ततः प्रववृत्ते युद्धं देव्याः शुम्भस्य चोभयोः।
पश्यतां सर्वदेवानामसुराणां च दारुणम।
शत्वर्षैः शितैः शस्त्रेस्तथास्त्रैश्चैव दारुणैः।
तयोर्युद्धभूद्भूयः सर्वलोकभयङ्करम्।

दुर्गादेव्या सार्शवे शुम्भस्य भीषण युद्धस्य वर्णनम् दुर्गासप्तशती ग्रन्थे अनेन रूपेण प्राप्यते-

दिव्यान्यस्त्राणि शतशो मुमुचे यान्यथाम्बिका।
बभञ्ज तानि दैत्येन्द्रस्तस्तरप्रतीघातकर्तुमिः।
मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी।
बभञ्ज लीलयैवोग्रहुङ्कारोच्चारणादिभि।
ततः शरशतैर्देवीमाच्छादयत सोऽसुरः।
सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः।
छिन्ने धनुषि दैत्येन्द्रस्तथा शक्तिमथाददे।
चिच्छेद देवी चक्रेण तामप्यस्य करे स्थिताम्।
ततः खड्गमुपादाय शतचन्द्र च भानुमत् ।
अभ्यधावत्तदा देवीं दैत्यानामधिपेश्वरः।
तस्यापतत एवाशु खड्गं चिच्छेद चण्डिका।
धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलम्।
हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः।
जग्राह मुद्गरं घोरमम्बिकानिधनोद्यतः।
चिच्छेदापततस्तस्य मुद्गर निशितैः शरै।
तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान्।
समुष्टिं पातयामास हृदये दैत्यपुङ्गवः।
देव्यास्तं चापि सा देवी तालेनोरस्यताडयत्।
तलप्रहाराभिहतो निपपात महीतले।
स दैत्यराजः सहसा पुनरेव तथोत्थितः।
उत्पत्य च प्रगृद्ययोच्चैर्देवीं गगनमस्थितः।
तत्रापि सा निराधारा युयुधेतेन चण्डिका।
नियुद्धं खे तदा दैत्यश्चण्डिका च परस्परम्।
चक्रतुः प्रथमं सिद्धमुनिविस्मयकारकम्।
ततो नियुद्धं सुचिरं कृत्वा तेनाम्बिका सह।
उत्पात्य भ्रामयामास चिक्षेपधरणीतले।
स क्षिप्रो धरणीं प्राप्य मुष्टिमुद्यम्य वेगितः।
अभ्यधावत दुष्टात्मा चण्डिकानिधनेच्छया।
तमायान्तं ततो देवी सर्वदैत्यजनेश्वरम्।
जगत्यां पातयामास भित्त्वा शूलेन वक्षसि।
स गतासुः पपातोर्व्यां देवीशूलग्रविक्षतः।
चालयन् सकलां पृथ्वीं साधिद्वीयां सपर्वताम्।
ततः प्रसन्नमखिलं हते तस्मिन् दुरात्मनि।

अनेन प्रकारेण दुर्गासप्तशती ग्रन्थे दुष्ट शुम्भस्य मृत्यु भवति । भोला शंकर व्यासेनाऽपि अनेन प्रकारेण स्वकीय महाकाव्ये शुम्भ–वधस्य वर्णनम् कृतोस्ति। शक्तिजय महाकाव्ये षोडश सर्गा विद्यन्ते। अयं महाकाव्यः नायिका प्रधान महाकाव्यो विद्यते। अस्य महाकाव्यस्य प्रधान पात्रः दुर्गा देव्या विद्यते। शुम्भ-निशुम्भः खलनायकौ विद्यन्ते वीरादिरस समन्वितो श्रङ्गार रसः, शब्दार्थालङ्कृतयः माधुर्मादयो गुणाः, वैदर्भ्यादयो रीतयः, रसिकाश्च सर्वमनुभवन्ति स्वात्मनाऽनुरञ्जयन्ति। शक्तिविजय महाकाव्यस्य परिचय क्रमे मया प्राप्यते यत् अस्य महाकाव्यस्य रचना प्रो० भोला शंकर व्यास महाभागेन दुर्गासप्तशती ग्रन्थस्य शुम्भवध प्रकरणस्य आधरेण कृतोऽस्ति। अयं एक: विशिष्ट: सुलिष्ट, रस- गुणालंकारादि संश्लिष्ट, दिव्य काव्यग्रन्थोऽस्ति। दुर्गा देव्या कथा अतिरोचका विद्यते । अस्य कथानक वैदिक साहित्ये, पुराणे एवञ्च आधुनिक साहित्येऽपि प्राण्येत । परन्तु महाकाव्यरूपेण व्यासमहाभागं विहाय अद्यावधि कुत्राऽपि न दृश्यते। संस्कृत साहित्ये महाकाव्यलेखनं समधिकं प्राचीनम्। देववाणी संस्कृतस्य प्रचीनेषु काव्यकारेषु कालिदास-अश्वघोष-भारवि-माघ-रत्नाकर-श्रीहर्षप्रभृतानां नामान्युल्लेख्यानि सन्ति। आधुनिक काले ऐतिहासिकानि, धार्मिकाणि च महाकाव्यानि निर्मितानि। आधुनिके काले महाकाव्यविधायां संस्कृत लेखनं भारतीयानमन्यासां भाषाणां साहित्यापेक्षया समधिकतया प्राप्तश्रयं जातम्। संस्कृतसाहित्येहासे आधुनिक कालः व्यापकऽर्थे वर्तमान साहित्य सन्दर्भे एव न सीमितः। शब्दोऽयं कालखण्डविशेषस्य वाचकः। अनया दृष्ट्या आधुनिककालः वर्षाणां शतकत्रये प्रसृतः। आधुनिक कालस्य साहित्यिकचेतना प्राचीनकालात् पृथग्वर्तते। परम्परामनुसरद्भिः अपि अर्वाचीन कविभिः नूतनमेव साहित्यं विरचितं विरच्यते च।

आधुनिककाले प्रशस्तिगान परक काव्यं बाहुल्येन रचितम्। कवयः अष्टादशशतकस्य प्रारम्भे स्थानीय सामान्तशासकानां तत् आंग्लशासकानां स्वतंत्र भारते च प्रधानमन्त्रिणां जीवनचरितानि अवलम्ब्य काव्यरचनामकुर्वन्। राजप्रशास्तिः संस्कृतकवीनां परम्परागतः प्रियो विषयः। आधुनिककालं तु राज्ञां राजनेतृणां च प्रशस्ति बाहुल्यात् महाकाव्यं विरुद्धमिव प्रतीयते।

आधुनिक महाकाव्ये उत्तरनैषध महाकाव्यं, सुदामाश्चरितं महाकाव्यं, श्रीरामभक्तिकल्लोलिनी महाकाव्यं, रत्नोदयं महाकाव्यं, श्रीतुलसीयशस्तिलकं महाकाव्यं चेति। अराजकता काले रचित साहित्ये ईश्वर विलासम्, अजितोदयम्, अभयोदयम्, अजितचरित्रम् अब्दुल्लाचरितं, जयवंशादीनि च प्रतिनिधिकाव्यानि। ब्रिटिशशासनकाले रचिते साहित्ये विक्टोरिया चरित संग्रहः, विक्टोरिया महात्म्यम्, आङ्ग्लसाम्राज्यम्, आङ्लजर्मनीययुद्धविवरणं, युद्धवृद्धसौहार्दम्, एड्वर्डवंशमहाकाव्यं, स्वगताशीः कुसुमाञ्जलिश्च मुख्यानि। स्वातन्त्र्योत्तरवर्तिनि काव्येऽपि प्रशस्तिः स्तुतिरूपैव। तद्यथा देवदूतकाव्ये प्रधानमन्त्रिणः जवाहरलालनेहरोः प्रशस्ति-

त्वं देवोऽसि त्वमसि सुमनास्त्वं सुरस्तवं दिवौका।
त्वं चादित्यो कुतुमुगमरस्त्वं सुपर्वास्यमर्त्यः।
गीर्वाणस्त्वन्दिषदजरो निर्जराश्चादितेयो।
दैत्यारिस्त्वं विदिशविबुधो लेखवृन्दारकस्त्वम्।

आधुनिक काले सर्वास्वेव काव्यविधासु भक्तिप्रधानस्य साहित्यस्य रचना संजाता। भक्तिप्रधानं काव्यं द्विविधं देवचरितात्मकं सन्तचरितात्मकं चेति। प्रो० भोला शंकर व्यासस्य शक्ति जय महाकाव्यम् देवचरितात्मकं महाकाव्यम् विद्यते। आधुनिक समये देवचरितात्मकं काव्यमध्ये शक्तिजय महाकावयस्य प्रमुख स्थानो विद्यते।

**संदर्भः**

1. श्री दुर्गासप्तशती - 10 / 5-6
2. श्री दुर्गासप्तशती 10 / 10-11
3. श्री दुर्गासप्तशती - 10/12-27
4. संस्कृत साहित्य विमर्शः, श्री द्विजेन्द्र नाथ शास्त्री, भारतीय प्रकाशन, मेरठतः, 1956
5. संस्कृत कवि दर्शनः, डा० भोल शंकर व्यास, चौखम्बा प्रकाशन, वाराणसीतः, 1983
6. संस्कृत भाषा शास्त्रीय अध्ययनः, बलदेव उपाध्यायः, विश्वविद्यालय प्रकाशन, वाराणसीतः, 1978